योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य उत्तरार्धम्)/सर्गः १३२

द्वात्रिंशाधिकशततमः सर्गः १३२

भास उवाच ।

मन्दरे मृदुमन्दारमन्दिरे मन्दराभिधाम् ।

आलिंग्याऽप्सरसं सुप्तं सरित्तृणमिवानयत् ।। १

मामथासौ मया पृष्टा समाश्वास्य जलाकुला ।

बाले किमिदमित्युक्तं तया चपलनेत्रया ।। २

इह चन्द्रोदयेष्वेताश्चन्द्रकान्तकटप्रजाः ।

नद्यो माद्यन्ति वनिताः सेष्टा इव निशागमे ।। ३

त्वत्संगमरसावेशवशात्तन्ननु विस्मृतम् ।

इत्युक्त्वा मामुपादाय सोड्डीना विहगीव खम् ।। ४

भृङ्गं श्रृङ्गवतः श्रृङ्गे गङ्गाकनकपङ्कजे ।

अहमासं समाः सप्त तत्क्लिन्नोऽकर्दमाप्लुते ।। ५

अन्यन्मया जगद्दृष्टमृक्षचक्रविवर्जितम् ।

गर्भगर्भस्थैकजातिस्वप्रकाशजनावृतम् ।। ६

न दिग्विभागो न दिनानि यत्र

न चैव शास्त्राणि न वेदवादाः ।

न चैव दैत्यादिसुरादिभेदो

जगन्मया तादृगथात्मदीप्तम् ।। ७

विद्याधरामरविहारविमानभूमा-

वभ्रंलिहाचलनितम्बकदम्बकच्छे ।

आसं समाः समरसोऽमरसोमनामा

सप्तान्यसप्त ससमुद्रतटे तपस्वी ।। ८

पवनवहनसंनिवेशनाना-

सुहयपयोधरदेहकैरनेकैः ।

गजहरिणमृगेन्द्रवृक्षवल्ली-

मृगनगपन्नगपक्षिभिः परीतम् ।। ९

गगनमवनितः समेत्य वह्ने -

र्वरविभवेन जगत्यनन्तकोशम् ।

क्वचिदहमभितो दिदृक्षुरग्रे

सृत उरगाशनवद्बलादविद्याम् ।। १०

क्वचिदहं जगतः परिनिर्गतः

पतित एकमहार्णवविस्तृते ।

नभसि तत्र निवासिनिभे सितः

समयमन्वभवं पतनं तथा ।। ११

आकाशकोशपतनानुभवैकवृत्तेः

श्रान्तस्य मे पदमकार्यथ निद्रयान्तः ।

तादृक्सुषुप्तवपुषाथ मयोपलब्धं

स्वप्नात्मजाग्रति तदात्मनि तत्र विश्वम् ।। १२

भूयो दिगन्तभुवनामरमन्दराद्रि-

संसारचञ्चलतया लतयेव पक्षी ।

अक्षीणवातबलया परिचाल्यमान-

स्तन्मासु तासु पतितो हि जगद्गुहासु ।। १३

विषयाशा दृशो यावत्तावद्यातः क्षणादहम् ।

पुनस्तथैव पश्यंस्तु दृश्यं यातः पुनःपुनः ।। १४

इति दृश्यमदृश्यं च गम्यं चागम्यमेव च ।

वेगाल्लङ्घयतो देशं मम वर्षगणा गताः ।। १५

दृश्याख्याया अविद्याया न त्वन्तं प्राप्तवानहम् ।

मिथ्यैव हृदि रूढायाः पिशाच्या इव बालकः ।। १६

नेदं नेदं सदित्येव विचारानुभवे स्थितम् ।

तथापीदमिदं चेति दुर्दृष्टिर्न निवर्तते ।। १७

प्रतिक्षणं सुखैर्दुःखैर्देशकालैः समागमैः ।

सरिद्वारिवदालोला नवमायान्ति यान्ति च ।। १८

तालीतमालबकुलातुलतुङ्गश्रृङ्ग-

मुन्नादवातजवमेकमहं स्मरामि ।

सूर्यादिभिर्विरहितं प्रकटं स्वकान्त्या

सस्थावराद्रितटजङ्गममेव विश्वम् ।। १९

यदेतदेकान्तविहारहारि

स्वच्छन्दमेकामितमस्तशङ्कम् ।

क्वचिन्मया चारुजगत्सु दृष्टं

तुल्या न तस्यामरराजलक्ष्मीः ।। २०

इत्यार्षे श्रीवासिष्ठमहा० वा० दे० मो० नि० उ० अवि० वि० भासवर्णितस्वजन्मपरम्परा नाम द्वात्रिंशाधिकशततमः सर्गः ।। १३२।।